# २१. अणु राघवेंद्र स्तोत्रम्

पूज्याय राघवेंद्राय सत्यधर्मरताय च ।
भजतां कल्पवृक्षाय नमतां कामधेनवे ।१।

दुर्वादिध्वांतरवये वैष्णवेंदीवरेंदवे ।
श्री राघवेंद्रगुरवे नमोऽत्यंत दयालवे ।२।

श्री सुधींद्राब्धिसंभूतान् राघवेंद्र कलानिधीन् ।
सेवे सुज्ञानसौख्यार्थं संतापत्रय शांतये ।३।

अघं द्रावयते यस्मात् वेंकारो वांछितप्रदः ।
राघवेंद्र यतिस्तस्माल्लोके ख्यातो भविष्यति ।४।

व्यासेन व्याप्तबीजः श्रुतिभुवि भगवत्पादलब्धांकुरश्रीः
प्रत्नैरीषत्प्रभिन्नोऽजनि जयमुनिना सम्यगुद्भिन्नशाखः ।
मौनीश व्यासराजादुदितकिसलयः पुष्टितोऽयं जयींद्राद्-
अद्य श्री राघवेंद्राद्विलसति फलितो मध्वसिद्धांतशाखी ।५।

॥ इति अणु राघवेंद्र स्तोत्रं संपूर्णम् ॥